# Rishigautamaproktam Divyashivanamaih Shivarchanopadesham

# ऋषिगौतमप्रोक्तं दिव्यशिवनामैः शिवार्चनोपदेशम्

## Document Information

Text title : Rishigautamaproktam Divyashivanamaih Shivarchanopadesham

File name : divyashivanAmaiHshivArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 23| 146-180||

See corresponding nAmAvalI

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 20, 2024

*sanskritdocuments.org*

# ऋषिगौतमप्रोक्तं दिव्यशिवनामैः शिवार्चनोपदेशम्

(शिवरहस्यान्तर्गते उग्राख्ये)
अनन्यशरणा नित्यं शिवमेव भजन्ति ये ।
त एव धन्याः शैवाश्च कृतकृत्या न संशयः ॥ १४६॥

भजन्त्यनन्यभावेन भवानीरमणं प्रभुम् ।
भाग्यवन्तस्ततस्तेभ्यो नमो भूयो नमो नमः ॥ १४७॥

येषामन्त्यतनुर्विप्रास्त एव गिरिजापतिम् ।
अनन्यभावाः सततं भजन्त्यव्यभिचारतः ॥ १४८॥

येन सर्वाणि कर्माणि वैदिकानि महेश्वरे ।
समर्प्यन्तेऽनिशं तेन मुक्तिर्लभ्या न सशयः ॥ १४९॥

अत्यन्तदुर्लभा मुक्तिः प्राप्यते शिवपूजया ।
तादृशी शिवपूजैव कर्तव्या विधिवद्द्विजैः ॥ १५०॥

प्राणानायम्य सङ्कल्प्य स्नात्वोद्धूल्य च भस्मना ।
धृत्वा त्रिपुण्ड्ररुद्राक्षान्कर्तव्यं शिवपूजनम् ॥ १५१॥

महेश एव सम्पूज्यो मुक्त्यर्थिभिरहर्निशम् ।
यतो महेश्वरः साम्बो मुक्तिदः सर्वदेहिनाम् ॥ १५२॥

न रुद्रादपरो देवो भगवानिति गीयते ।
तस्मात्स भगवान् रुद्रो भजनीयो मुमुक्षुभिः ॥ १५३॥

भगवन्तमुमाकान्तं भजन्ति भवभीरवः ।
न रुद्रादपरो देवो भवभीमभयापहः ॥ १५४॥

यो "यो वै रुद्र" इत्यत्र वैकारो वर्तते द्विजाः ।
स एवकारस्तेनान्ययोग एव निषिध्यते ॥ १५५॥

भगवान् रुद्र एवेति वैकारेण विनिश्चिते ।

रुद्रान्यो भगवान्कोऽपि नेति निश्चीते द्विजाः ॥ १५६॥

भगवन्तमुमाकान्तमनन्या ये भजन्ति तान् ।
नमस्कुर्मो नमस्कुर्मो नमस्कुर्मः पुनः पुनः ॥ १५७॥

ॐ शिवरुद्रमहादेव भगवन् शङ्करेश्वर ।
महेश्वरेति सततं वदन्त्वनुदिनं द्विजाः ॥ १५८॥

साम्ब शम्भो विरूपाक्ष विष्णुब्रह्मादिवन्दित ।
सदाशिवेति सततं वदन्त्वनुदिनं द्विजाः ॥ १५९॥

चन्द्रशेखर विश्वेश चन्द्रसूर्याग्निलोचन ।
परात्परेति सततं वदन्त्वनुदिनं द्विजाः ॥ १६०॥

अनन्तसोमसूर्याग्निप्रभाधिक महाप्रभो ।
विश्वनाथेति सततं वदन्त्वनुदिनं द्विजाः ॥ १६१॥

उमाकान्तामराराध्य भगवन्नीललोहित ।
ललाटाक्षेति सततं वदन्त्वनुदिनं द्विजाः ॥ १६२॥

हरामरेश शैलेशकन्याश्लिष्टवपुर्धर ।
कालकालेति सततं वदन्त्वनुदिनं द्विजाः ॥ १६३॥

कर्पूरगौर कामारे नरसिह्मनिषूदन ।
देवतासार्वभौमेति वदन्त्वनुदिनं द्विजाः ॥ १६४॥

वामदेवामराधीश भसितोद्धूलनप्रिय ।
विश्वरूपेति सततं वदन्त्वनुदिनं द्विजाः ॥ १६५॥

भव शङ्कर लोकेश शूलपाणे महेश्वर ।
शिवप्रियेति सततं वदन्त्वनुदिनं द्विजाः ॥ १६६॥

उग्र भीम भवाराते भर्ग त्रिपुरसूदन ।
नीलकण्ठेति सततं वदन्त्वनुदिनं द्विजाः ॥ १६७॥

विष्णुनेत्रार्चितानर्घ्य शरण्यपदपङ्कज ।
मृत्युञ्जयेति सततं वदन्त्वनुदिनं द्विजाः ॥ १६८॥

त्रिकाग्निकाल कालज्ञ कालकूटविषाशन ।
कलिकल्मषापहेत्येवं वदन्त्वनुदिनं द्विजाः ॥ १६९॥

खट्वाङ्गपाणे सर्वात्मन्नन्धकासुरसूदन ।
सर्वेश्वरेति सततं वदन्त्वनुदिनं द्विजाः ॥ १७० ॥

कैलासवासिन् गौरीश वृषाङ्क वृषभध्वज ।
सर्वोत्तमेति सततं वदन्त्वनुदिनं द्विजाः ॥ १७१ ॥

काशीनाथाविमुक्तेश भवानीप्राणवल्लभ ।
उमासहाय चिद्रूप निरञ्जन निरामय ॥ १७२ ॥

परमात्मेति(मरेति) सततं वदन्त्वनुदिनं द्विजाः ।
एतानि दिव्यनामानि महेशस्य महात्मनः ॥ १७३ ॥

जपनीयानि यत्नेन मुमुक्षभिरहर्निशम् ।
स्मर्तव्योऽस्माभिरनिश स्मरापस्मारनायकः ॥ १७४ ॥

न हि स्मरहरादन्यः स्मर्तव्योऽस्माभिरन्वहम् ।
अतः संसारनाशाय स्मर्तव्यः परमेश्वरः ॥ १७५ ॥

शिवनामकुठारेण निर्मूलानि भवन्ति हि ।
संसारतरुमूलानां पातकं मूलमुच्यते ॥ १७६ ॥

तन्नाशस्तु भवत्येव शिवनामसकृज्जपात् ।
सादरं भस्मदिग्धाङ्गो वदेच्छिव शिवेति च ॥ १७७ ॥

स संसारविनिर्मुक्तो भवत्येव न संशयः ।
ये कुर्वन्ति शिवध्यानं भस्मरुद्राक्षभूषणाः ॥ १७८ ॥

ते भविष्यन्ति विप्रेन्द्राः शेषभूषणभूषिताः ।
अनेकजन्मभिर्नित्यं पुण्यं बहुकृत यदि ॥ १७९ ॥

तदा शिवार्चने श्रद्धा भवेन्नामजपेऽपि च ।
शिवेति शिवदं नाम येनोच्चरितमादरात् ॥ १८० ॥

॥ इति शिवरहस्यान्तर्गते ऋषिगौतमप्रोक्तं दिव्यशिवनामैः शिवार्चनोपदेशं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २३ । १४६-१८० ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 23 . 146-180..

Notes:

Ṛṣi Gautama ऋषि गौतम delivers Upadeśa उपदेश about Worshiping Śiva शिव with His Divine Names i.e. DivyaŚivaNāmāni दिव्यशिवनामानि (that are enlisted in Śloka-s 158 to 173). He asserts that the axe of Śivanāma शिवनाम uproots the tree of Samsāra संसार; and that those who engage in Śivadhyāna शिवध्यान - while being adorned with Bhasma भस्म and Rudrākṣa रुद्राक्ष - certainly gain Liberation from the Samsāra संसार.

The DivyaŚivaNāmāvaliḥ दिव्यशिवनामावलिः derived from this Upadeśa उपदेश can be referred to from the link given below.

The Rudrastavaḥ रुद्रस्तवः Yo vai Rudraḥ यो वै रुद्रः, can be referred to from two of the links given below.

Proofread by Ruma Dewan

*Rishigautamaproktam Divyashivanamaih Shivarchanopadesham*

pdf was typeset on June 20, 2024

Please send corrections to *sanskrit@cheerful.com*